# Ganesha Lila StutiH 2

# गणेशलीलास्तुतिः २

## Document Information

Text title : Ganesha Lila Stutih

File name : gaNeshalIlAstutiH2.itx

Category : ganesha

Location : doc_ganesha

Transliterated by : Aruna Narayanan narayanan.aruna at gmail.com

Proofread by : Aruna Narayanan

Latest update : May 24, 2020

Send corrections to : sanskrit@cheerful.com

This text is prepared by volunteers and is to be used for personal study and research. The file is not to be copied or reposted without permission, for promotion of any website or individuals or for commercial purpose.

**Please help to maintain respect for volunteer spirit.**

Please note that proofreading is done using Devanagari version and other language/scripts are generated using **sanscript**.

May 31, 2020

*sanskritdocuments.org*

Ganesha Lila StutiH 2

# गणेशलीलास्तुतिः २

ॐलाक्षासिन्दूरवर्णं सुरवरनमितं मोदकैर्मोदितास्यं
    हस्ते दन्तं ददानं हिमकरसदृशं तेजसोग्रं त्रिनेत्रम् ।
दक्षे रत्नाक्षसूत्रं वरपरशुधरं साखु सिंहासनस्थं
    गाङ्गेयं रौद्रमूर्तिं त्रिपुरवधकरं विघ्नभक्षं नमामि ॥ १॥

गौरीपुत्रं त्रिनेत्रं गजमुखसहितं नागयज्ञोपवीतं
    पद्माक्षं सर्वभक्षं सकलजनप्रियं सर्वगन्धर्वपूज्यम् ।
सम्पूर्णभालचन्द्रं वरदमतिबलं हन्तृकं चासुराणां
    हेरम्बमादिदेवं गणपतिममलं सिद्धिदातारमीडे ॥ २॥

यं ब्रह्म वेदान्तविदो वदन्ति परं प्रधानं पुरुषं तथान्ये ।
विश्वोद्गतेः कारणमीश्वरं वा तस्मै नमो विघ्नविनाशकाय ॥ ३॥

गजवदनमचिन्त्यं तीक्ष्णदन्तं त्रिनेत्रं
    बृहदुदरमनन्तं दन्तमाले ददानम् ।
परशुचषकपद्मद्वन्द्वहस्तारविन्दं
    हरियुगलनिविष्टं श्रीगणेशं भजामि ॥ ४॥

अभयवरदपाणिं लाड्डूपात्रं सुदन्तं
    नरपतिजपमालां नागपाशाङ्कुशं च ।
कनकमयविचित्रं मुद्गरं पाणिपद्मे
    परशुमपि वहन्तं विघ्नराजं नमामि ॥ ५॥

विघ्नेशं विश्ववन्द्यं सुविपुलयशसं लोकरक्षाप्रदक्षं
    साक्षात्सर्वापदासु प्रशमनसुमतिं पार्वतीप्राणसूनुम् ।
प्रायः सर्वासुरेन्द्रैः ससुरमुनिगणैः साधकैः पूज्यमानं
    कारुण्येनान्तरायामितभयशमनं विघ्नराजं नमामि ॥ ६॥

उच्चैर्ब्रह्माण्डखण्डद्वितय सहचरं कुम्भयुग्मं दधानः

प्रेङ्खन्नागारि पक्षप्रतिभटविकट श्रोत्रतालाभिरामः ।
देव्याः शम्भोरपत्यं भुजगपतितनुस्पर्धि वर्धिष्णुहस्त-
स्त्रैलोक्याश्चर्यमूर्तिः स भवतु सततं भूतये कुञ्जरास्यः ॥ ७॥

नमो नमो गजेन्द्राय एकदन्तधराय च ।
नमः ईश्वरपुत्राय गणेशाय नमो नमः ॥ ८॥

माता यस्य उमादेवी पिता यस्य महेश्वरः ।
मूषको वाहनं यस्य स नः पायाद्गणाधिपः ॥ ९॥

वन्दे वराभयपिनाककपालखड्गखट्वाङ्गदन्तमुसलाब्जकरं त्रिनेत्रम् ।
भीमं जटामुकुटिनं कमलासनस्थं काश्मीरवासममलं गणराजमाद्यम् ॥ १०॥

रक्ताङ्गरागं परश्वक्षमालासुदन्तपाणिं सितलड्डूपात्रम् ।
गजाननं सिंहरथाधिरूढं गणेश्वरं विघ्नहरं नमामि ॥ ११॥

संसिद्ध्यर्थनमत्सुरासुरमिलन्मौलिस्थितप्रोल्लसत्-
सद्रत्न प्रभव प्रकृष्ट विभव प्रेङ्खन्मयूखोज्ज्वलत् ।
श्रेयो विघ्नमहाभयप्रशमने दिव्यं यदेकौषधं
भूयान्नो द्विरदाननाङ्घ्रिकमलद्वन्द्वं तदिष्टाप्तये ॥ १२॥

बिभ्रत्पञ्चमुखानि योयमुदितः स्वातन्त्र्यमात्रात्मना
शक्तेर्वैभवतः परप्रतिहतद्वैताख्यविघ्नव्ययः ।
एकीभूतमुखः सकारणगणानुकारिणा तेजसा
देवःसंप्रति भासतां मयि यथा तत्त्वं गणाधीश्वरः ॥ १३॥

हस्तीन्द्राननमिन्दुचूडमरुणच्छायं त्रिनेत्रं रसादाश्लिष्टं
प्रियया समपद्मद्यमकरया स्वाङ्कस्थया सन्ततम् ।
बीजापूरगदाधनुस्त्रिशिखयुक्चक्राब्जपाशोत्पल-
व्रीह्यग्रस्थविषाणरत्न कलशान् हस्तैर्वहन्तं भजे ॥ १४॥

देव स्थूलतनुं गजेन्द्रवदनं लम्बोदर सुन्दरं
विघ्नेशं मदगन्धलोलमधुपव्यालोलगण्डस्थलम् ।
दन्ताघातविदारिताहितजनं सिन्दूरशोभाकरं
वन्दे शैलसुतासुतं गणपतिं सिद्धिप्रदं कामदम् ॥ १५॥

द्विचतुर्दशवर्णभूषिताङ्गं मुसलाम्भोजधरं महोपवीतम् ।
द्विमृगाधिपगामिनं त्रिनेत्रं हरपुत्रं द्विरदाननं भजेऽहम् ॥ १६॥

जटामुकुटमण्डितं त्रिनयनं भजे षड्भुजं
सतीसरनिवासिनमसुरनाशनं लोहितम् ।
वराभयपिनाकिनं त्वसिकपालभृच्छूलिनं
गणैर्वृतगणेश्वरं कमलगं च मीमाकृतिम् ॥ १७॥

गजाननं भूतगणाधिसेवितं कपित्थजाम्बूफलसारभक्षणम् ।
उमापतेः शोकविनाशकारणं नमामि विश्वेश्वरमाशु सिद्धिदम् ॥ १८॥

लम्बोदरैकवदनः कमलासनस्थ-
श्चन्द्रार्धमौलिरमलो भुजगेन्द्रहारः ।
भीमोऽष्टबाहुरुदितार्कमरीचिरष्ट
सिद्धिप्रदो भवतु वाञ्छितसिद्धिदोनः ॥ १९॥

योऽभ्यर्चितः सुरगणैर्वरसिद्धिहेतोश्छेत्तं
भयानि च करे परशुं दधानः ।
देवः स शम्भुदयितापरिवर्धित
श्रीर्विघ्नान्निवारयतु वारणराजवक्त्रः ॥ २०॥

इति गणेशलीलास्तुतिः समाप्ता ।

Encoded and proofread by Aruna Narayanan

*Ganesha Lila StutiH 2*

pdf was typeset on May 31, 2020

Please send corrections to *sanskrit@cheerful.com*